International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(5): 72-73
© 2016 IJSR
www.anantaajournal.com
Received: 16-07-2016
Accepted: 17-08-2016

**सुधासिन्धु घोष**
सहायक-शिक्षकः,
गीतालदह-उच्च-विद्यालयः,
पश्चिम-वड्.ग

**Correspondence**
**सुधासिन्धु घोष**
सहायक-शिक्षकः,
गीतालदह-उच्च-विद्यालयः,
पश्चिम-वड्.ग

# मानवानां वास्तविकोन्नयणे शास्त्रोपदेशः

## सुधासिन्धु घोष

मानवः सांसरिकजीवः भवति। सांसारिक-विषयसुखभोगेन ते समग्रं जीवनम् अतिवहितुमिच्छन्ति।
अनेन ऐतिकसुखभोगेन ते वहुविधा समस्यायाः विपदश्च सम्मुखीनं भवन्ति।
वैराग्यशतके कविना भर्तृहरिणा उक्तम्- ''भोगे रोगभयम्...'' अर्थतः अत्यधिकं विषयसुखभोगेन मानवाः वहुविधा रोगाक्रान्ताः भवन्ति।
मनुसंहितायामपि आचार्येण मनुना उक्तम्-

''अनारोग्यमनायुष्यमस्वगर्ग्यं चातिभोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात् तत् परिवर्जयेत्।"2/57

अतिभोजनं मानवानां आरोग्य-आयुः-स्वर्ग-पुण्यनाशकं लोकनिन्दकं च भवन्ति।
मनुष्याणां जीवने वहब वास्तविकसमस्या सन्ति। एतेषु वास्तविकसमस्यासमाधनेषु ते देवतानुग्रहं लब्धुम् इच्छन्ति। यतः मानवानां अभीष्टः भवति तेषां वास्तविकंम् आध्यात्मिकं च उन्नतिविधानम्। अतः ते देवतार्चनादिं कार्यं सम्पादयन्ति। केवलमेव देवार्चनया देवतायाः अनुग्रहः लभ्यते वा न वा? अपि च देवपूजायाः सन्तुष्टेः वा लाभाय उपायः कः? एतत् विषयम् अत्र विचार्यते।
जगति मानवाः यानि भोग्यवस्तूनि भुञ्जते तानि स्वेषाम् अर्जितानि ईति मन्यन्ते, स्वयमेव च भुञ्जते। मनुष्याणां पार्थिवभोग्यविषचाहिदा इयं कदापि न शाम्यति,अग्नौ घृतकाष्ठादिनिक्षेपवद् तत्तु क्रमेण वर्धते।भगवता मनुना उक्तम्-

''न जातु कामः कामानामुपभोगेन शाम्यति।''
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते।। 2/94

ईश्वरस्य कृपया लब्धानि पार्थिववस्तूनि मानवाः स्वेषां योग्यतालब्धवस्तूनि मत्वा ईश्वराय प्रदाणं विना भुञ्जते। ईदृशं जनं 'स्तेन' इति आख्यया आख्यायितं गीतायाम् तत्रोक्तम्-
''इष्टान् भोगान् हि वो देवा दास्यन्ते यरूभाविता।
तैर्दत्तानप्रदायैभ्यो यो भुड्क्ते स्तेन एव सः।।'' 3/12

ईश्वरः सर्वभूतेषु प्राणीषु विराजते। अतः सर्वप्राणीनां सेवया ईश्वरं सन्तुष्टं क्रियते।
ईशोपनिषदि उक्तम्-

''ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्याक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।
ईशा-1

अनया धारणया वैदिकयुगे एव पञ्चमहायज्ञस्य उत्पत्तिः भवतिस्म। तैत्तिरीय-आरण्यके उक्तम्- ''पञ्च वा एते महायज्ञा सतति प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः पितृयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति।"तेषां स्वरूपविषये तत्रोक्तम्- "यदग्नौ जुहोत्यपि समिधंतद्दैवयज्ञः सन्तिष्ठते। यभ्दूतेभ्यो वलिं हरति तद् भूतयज्ञः संतिष्ठते। यद् ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठते। यत् स्वधायमधीयीतैंकाम्य्यृचं यजुः साम वा तद् ब्रह्मयज्ञः संतिष्ठते।"
अनेन पञ्चमहायज्ञेन ईश्वरस्य साकारमूर्तिस्वरूपाः प्राणिनः परितुष्टाः भवन्ति। तेषां संतुष्टिना च ईश्वरः सन्तुष्य मनुष्याणां अभीष्टं सिध्यति। तैत्तिरीय-आरण्यके उक्तम्- "ते एनं तृप्ता आयुषा तेजसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद् येन च तर्पयन्ति इति।"

ये ये मानवाः सर्वप्राणीहिंसावर्जिता सन्तः प्राणीनां सेवन्ते तेषां मनस्कामना ईश्वरः सम्पूरयति। मनुसंहितायाम् उक्तम्-

''यद् ध्यायति यत् कुरुते धृतिं वध्नाति यत्र च।
तद् वाप्नोत्ययत्नेन यो हिनस्ति न किञ्चन।।"5/47
अतः सर्वदा प्राणीहिंसावर्जनेन ईश्वरस्य प्रियपात्रः भूयते।

केन प्रकारेण ईश्वरस्य सर्वसम्पद्प्रदानेन मनुष्याणां कीदृशी उन्नतिः सिध्यते, तत् आङ्.गलभाषया श्री रवीन्द्रनाथ ठाकुरस्य गीताञ्जल्याम् उद्धृतम्- "I bitterly wept and wished that I had had heart to give thee my all"

## सन्दर्भः


1. मनु (2/57)
2. मनु (2/94)
3. गीता (3/12)
4. ईशा (1)
5. तैत्तिरीय-आरण्यक
6. मनु (5/47)
7. गीताञ्जली